## अध्यायिन्यदेशकालात्। (७१/१६२२)

तत्र इत्येव। सप्तमीसमर्थाददेशवाचिनः प्रातिपदिकाद् अकालवाचिनः च अध्यायिन्यभिधेये ठक् प्रत्ययो भवति। अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते, तत इदं प्रत्ययविधानम्। श्मशानेऽधीते श्माशानिकः। चातुष्पथिकः। अकालात् – चतुर्दश्यामधीते चातुर्दशिकः। आमावास्यिकः। अदेशकालात् इति किम्? स्रुघ्नेऽधीते। पूर्वाह्णेऽधीते॥

## कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। (७२/१६२३)

तत्र इत्येव। कठिनशब्दान्तात् सप्तमीसमर्थात् प्रस्तारसंस्थानशब्दाभ्यां च ठक् प्रत्ययो भवति व्यवहरति इत्येतस्मिन्नर्थे। व्यवहारः क्रियातत्त्वम् यथा [1]लौकिकव्यवहारः इति। [2]वंशकठिने व्यवहरति वांशकठिनिकः [3]चक्रचरः। [4]वार्ध्रकठिनिकः। [5]प्रास्तारिकः। [6]सांस्थानिकः॥

## निकटे वसति। (७३/१६२४)

निकटशब्दात् सप्तमीसमर्थात् वसति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। यस्य [7]शास्त्रतो निकटवासस्तत्रायं विधिः। आरण्यकेन भिक्षुणा ग्रामात्[8] क्रोशे वस्तव्यम् इति शास्त्रम्। निकटे वसति नैकटिको भिक्षुः॥

## आवसथात् ष्ठल्। (७४/१६२५)

तत्र इत्येव। [9]आवसथशब्दात् सप्तमीसमर्थात् वसति इत्येतस्मिन्नर्थे ष्ठल् प्रत्ययो भवति। लकारः स्वरार्थः। षकारो ङीषर्थः। आवसथे वसति आवसथिकः। आवसथिकी। ठकः पूर्णोऽवधिः, अतः परमन्यः प्रत्ययो [10]विधीयते॥

## प्राग्घिताद् यत्। (७५/१६२६)

'तस्मै हितम्' (५.१.५/१६६५) इति वक्ष्यति। प्रागेतस्माद्धितसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामो यत् प्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति – 'तद्वहति रथयुगप्रासङ्गम्' (४.४.७६/१६२७)[11]। [12]रथ्यः। युग्यः। प्रासङ्ग्यः॥

## तद्वहति रथयुगप्रासङ्गम्। (७६/१६२७)

तद् इति द्वितीयासमर्थेभ्यो रथयुगप्रासङ्गेभ्यो वहति इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। रथं वहति [13]रथ्यः। युग्यः। प्रासङ्ग्यः। [14]'रथसीताहलेभ्यो यद्विधौ' (कात्या.वा. १) इति तदन्तविध्युपसङ्ख्यानात् परमरथ्यः[15] इत्यपि भवति॥

---

1. लौकिको व्यवहारः ड. 2. वंशकठिनेषु ड 3. वनचरकः ड. 4. वाध्रकठिनिकः चक्रचरः ब, नास्ति क. इ. ह. 5. नास्ति फ, चाक्रकठिनिकः इत्यधिकम् ब. ह. ड. इ, व्रीह्यादेः प्रसारणे व्यापृतः इत्यधिकम् ह. 6. प्रतिमादेः संस्थाशिक्षापरः सांस्थानिकः ड. 7. शास्त्रीयः ब. 8. बहिः इत्यधिकम् ड. 9. आवसथशब्दात् नास्ति ह. 10. अधिक्रियते ब. 11. इति इत्यधिकम् फ. 12.–13. रथ्यम् युग्यम् प्रासङ्ग्यम् फ. ज. 14. रथ–भवति इति नास्ति ब. फ. ज. ह. 15. उत्तमरथ्यः इत्यधिकम् ड, परमरथ्यम् क.